# भजगोविन्दं

भजगोविन्दं भजगोविन्दं गोविन्दं भजमूढमते ।

संप्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ्करणे ।।१।।

bhaja govindam bhaja govindam, govindam bhaja mūḍḥamate

samprāpte sannihite kāle nahi nahi rakṣati ḍukṛnkaraṇe . (1)

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।

यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ।।२।।

Mūḍha jahīhi dhanāgama tṛṣṇāṁ kuru sadbuddhiṁ manasi vitṛṣṇām,
yallabhase nijakarmopāttaṁ vittaṁ tena vinodaya cittam. (2)

नारीस्तनभर नाभीदेशं दृष्ट्वा मागामोहावेशम् ।

एतन्मांस वसादि विकारं मनसि विचिन्तय वारं वारम् ।।३।।

Nārī stanabhara nābhī-deśaṁ dṛṣṭvā māgā-mohāveśam,
etanmām-śaṁsā vasādi vikāraṁ manasi vicintaya vāraṁ vāram. (3)

नलिनीदलगत जलमतितरलं तद्वज्जीवितमतिशयचपलम् ।

विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ।।४।।

Nalinīdalagata jalamatitaralaṁ tadvajjīvitam atiśaya-capalam,
viddhi vyādhya bhimānagrastaṁ lokaṁ śokahataṁ ca
samastam. – 4

यावद्वित्तोपार्जन सक्तः स्तावन्निज परिवारो रक्तः ।

पश्चाज्जीवति जर्जर देहे वार्तां कोऽपि न पृच्छति गेहे ।।५।।

Yāvad vitto pārjana saktaḥ tāvannija parivāro raktaḥ,
Paścāj jīvati jarjara dehe vārtāṁ ko'pi na pṛcchati gehe. – 5

यावत्पवनो निवसति देहे तावत्पृच्छति कुशलंगेहे

गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ।।६।।

Yāvatpavano nivasati dehe tāvatpṛcchati kuśalaṁ gehe,
gatavati vāyau dehāpāye bhāryā bibhyati tasminkāye. – 6

बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीसक्तः ।

वृद्धस्तावच्चिन्तासक्तः परमे ब्रह्मणि कोऽपि न सक्तः ।।७।

Bālastāvat krīḍāsaktaḥ taruṇastāvat taruṇīsaktaḥ,
Vr̥ddhastāvac cintāsaktaḥ parame brahmaṇi ko'pi na saktaḥ. – 7

काते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।

कस्य त्वं कः कुत आयातः तत्त्वं चिन्तय तदिह भ्रातः ।।८।।

Kāte kāntā kaste putraḥ saṁsāro'yamatīva vicitraḥ,
kasya tvaṁ kaḥ kuta āyātaḥ tattvaṁ cintaya tadiha bhrātaḥ. – 8

सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।

निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ।।९।।

Satsangatve nissangatvaṁ nissangatve nirmohatvam,
nirmohatve niścalatattvaṁ niścalatattve jīvanmuktiḥ.- 9

वयसिगते कः कामविकारः शुष्के नीरे कः कासारः ।

क्षीणेवित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ।।१०।।

vayasigate kaḥ kāmavikāraḥ śuṣke nīre kaḥ kāsāraḥ,
kṣīṇevitte kaḥ parivāraḥ jnāte tattve kaḥ saṁsāraḥ. – 10

मा कुरु धन जन यौवन गर्वं हरति निमेषात्कालः सर्वम् ।

मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ।।११।।

mā kuru dhana jana yauvana garvaṁ harati nimeṣātkālaḥ sarvam,
māyāmayam-idam-akhilaṁ hitvā brahmapadaṁ tvaṁ praviśa viditvā. – 11

दिनयामिन्यौ सायं प्रातःशिशिरवसन्तौ पुनरायातः ।

कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ।।१२।।

Dinayāmini(au)  sāyaṁ prātaḥ śiśiravasantau punara ayātaḥ,
kālaḥ krīḍati gacchati  āyuḥ tadapi na muncatya-aśāvāyuḥ. – 12

कातेकान्ता धन गतचिन्ता वातुल किं तव नास्ति नियन्ता ।

त्रिजगति सज्जनसंगतिरैका भवति भवार्णवतरणे नौका ।।१३।।

kāte kāntā dhana gatacintā vātula kiṁ tava nāsti niyantā,
trijagati sajjana saṁgatiraikā bhavati bhavārṇava taraṇe naukā. – 13

जटिलो मुण्डी लुञ्छितकेशः काषायाम्बरबहुकृतवेषः ।

पश्यन्नपि चन पश्यति मूढः उदरनिमित्तं बहुकृतवेषः ।।१४।।

Jaṭilo muṇḍī luñchitakeśaḥ kāṣāyāmbara bahukṛtaveṣaḥ,
paśyannapi cana paśyati mūḍhaḥ udaranimittaṁ bahukṛtaveṣaḥ. – 14

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।

वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ।।१५।।

angaṁ galitaṁ palitaṁ muṇḍaṁ daśanavihīnaṁ jātaṁ tuṇḍam,
vrddho yāti gṛhītvā daṇḍaṁ tadapi na muñcatyāśāpiṇḍam. – 15

अग्रे वह्निः पृष्ठेभानुः रात्रौ चुबुक समर्पितजानुः ।

करतलभिक्षस्तरुतलवासः तदपि न मुञ्चत्याशापाशः ।।१६।।

agre vahniḥ pṛṣṭhebhānuḥ rātrau cubuka samarpita jānuḥ,
karatala bhikṣas tarutala vāsaḥ tadapi na muñcatyāśāpāśaḥ. – 16

कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।

ज्ञानविहीनः सर्वमतेन भजति न मुक्तिं जन्मशतेन ।।१७।।

kurute gaṅgā sāgara gamanaṁ vrata paripālana mathavā dānam,
jñāna vihinaḥ sarvama tena bhajati na muktiṁ janma śatena. – 17

सुर मंदिर तरु मूल निवासः शय्या भूतल मजिनं वासः ।

सर्व परिग्रह भोग त्यागः कस्य सुखं न करोति विरागः ।।१८।।

sura mandira taru mūla nivāsaḥ śayyā bhūtala majinaṁ vāsaḥ,

sarva parigraha bhoga tyāgaḥ kasya sukhaṁ na karoti virāgaḥ – 18

योगरतो वा भोगरतोवा सङ्गरतो वा सङ्गविहीनः ।

यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव ।।१९।।

Yogaratovā bhogaratovā sangarato vā sangavihīnaḥ,
yasya brahmaṇi ramate cittaṁ nandati nandati nandatyeva – 19

भगवद् गीता किञ्चिदधीता गङ्गा जललव कणिकापीता ।

सकृदपि येन मुरारि समर्चा क्रियते तस्य यमेन न चर्चा ।।२०।।

bhagavad gītā kiñcidadhītā gaṅgā jalalava kaṇikāpītā,
sakṛdapi yena murāri samarcā kriyate tasya yamena na carcā – 20.

पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम् ।

इह संसारे बहुदुस्तारे कृपयाऽपारे पाहि मुरारे ।।२१।।

punarapi jananaṁ punarapi maraṇaṁ punarapi jananī jaṭhare śayanam,
iha saṁsāre bahudusāre kṛpayā'pāre pāhi murāre – 21.

रथ्या चर्पट विरचित कन्थः पुण्यापुण्य विवर्जित पन्थः ।

योगी योगनियोजित चित्तो रमते बालोन्मत्तवदेव ।।२२।।

rathyā carpaṭa viracita kanthaḥ puṇyāpuṇya vivarjita panthaḥ,
yogī yoganiyojita citto ramate bālonmattavadeva – 22

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।

इति परिभावय सर्वमसारम् विश्वं त्यक्त्वा स्वप्न विचारम् ।।२३।।

Kastvaṁ ko'haṁ kuta āyātaḥ kā me jananī ko me tātaḥ,
iti paribhāvaya sarvamasāram viśvaṁ tyaktvā svapna vicāram. –
23

त्वयि मयि चान्य त्रैको विष्णुः व्यर्थं कुप्यसि मय्यसहिष्णुः ।

भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ।।२४।।

tvayi mayi cānya traiko viṣṇuḥ vyarthaṁ kupyasi
mayyasahiṣṇuḥ,
bhava samacittaḥ sarvatra tvaṁ vāñchasyacirādyadi viṣṇutvam –
24

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।

सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ।।२५।।

śatrau mitre putre bandhau mā kuru yatnaṁ vigrahasandhau,
sarvasminnapi paśyātmānaṁ sarvatrotsṛja bhedājñānam – 25

कामं क्रोधं लोभं मोहं त्यक्त्वाऽत्मानं पश्यति सोऽहम् ।

आत्मज्ञान विहीना मूढाः ते पच्यन्ते नरकनिगूढाः ।।२६।।

Kāmaṁ krodhaṁ lobhaṁ mohaṁ tyaktvā'tmānaṁ paśyati so'ham,
ātmajñāna vihīnā mūḍhāḥ te pacyante narakanigūḍhāḥ. – 26

गेयं गीता नाम सहस्रं ध्येयं श्रीपति रूपमजस्रम् ।

नेयं सज्जन सङ्गे चित्तं देयं दीनजनाय च वित्तम् ।।२७।।

Geyaṁ gītā nāma sahasraṁ dhyeyaṁ śrīpati rūpamajasram,
Neyaṁ sajjana sange cittaṁ deyaṁ dīnajanāya ca vittam. – 27

सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।

यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ।।२८।।

Sukhataḥ kriyate rāmābhogaḥ paścāddhanta śarīre rogaḥ,
yadyapi loke maraṇaṁ śaraṇaṁ tadapi na muñcati pāpācaraṇam.
– 28

अर्थमनर्थं भावय नित्यं नास्तिततः सुखलेशः सत्यम् ।

पुत्रादपि धन भाजां भीतिः सर्वत्रैषा विहिता रीतिः ।।२९।।

Arthamanarthaṁ bhāvaya nityaṁ nāstitataḥ sukhaleśaḥ satyam,
putrādapi dhana bhājāṁ bhītiḥ sarvatraiṣā vihitā rītiḥ.- 29

प्राणायामं प्रत्याहारं नित्यानित्य विवेकविचारम् ।

जाप्यसमेत समाधिविधानं कुर्ववधानं महदवधानम् ।।३०।।

Prāṇāyāmaṁ pratyāhāraṁ nityānitya vivekavicāram,
jāpyasameta samādhividhānaṁ kurvavadhānaṁ
mahadavadhānam – 30

गुरुचरणाम्बुज निर्भर भक्तः संसारादचिराद्भव मुक्तः ।

सेन्द्रियमानस नियमादेवं द्रक्ष्यसि निज हृदयस्थं देवम् ।।३१।।

Gurucaraṇāmbuja nirbhara bhaktaḥ saṁsārādacirādbhava muktaḥ,
sendriyamānasa niyamādevaṁ drakṣyasi nija hṛdayasthaṁ devam – 31

भजगोविन्दं भजगोविन्दं गोविन्दं भजमूढमते ।

भजगोविन्दं भजगोविन्दं गोविन्दं भजमूढमते ।